।। श्रीहरिः ।।

# गङ्गावतरणचम्पूप्रबन्धः



बालकृष्णदीक्षित-सूनु-श्रीशङ्कर-कृतः

## चित्रपरिचयः






कलानिधि-पूज्यपाद-गोस्वामि-१०८श्रीगोपीनाथजित्-महाराजैः सङ्गृहीतं (सङ्गणकयन्त्रजनित-विशेषप्रभावैः सम्यक्कृतं च) चित्रम्।

॥ श्रीहरिः ॥

संस्कृतोत्सव - शृङ्खलान्तर्गत-प्रकाशितः

# गङ्गावतरणचम्पूप्रबन्धः

(सप्तोच्छ्वासात्मकः)

श्रीमद्दीक्षितबालकृष्णसूनु-श्रीशङ्करविरचितः

✻ *प्रकाशकम्* ✻

श्रीगोवर्धनेश-प्रकाशन-मण्डलम्

(मुम्बापुरी)

प्रथम - संस्करणम् : श्रीवल्लभाब्दः ५३७ - वि. सं. २०७० - 2014 C.E.

निःशुल्कवितरणार्थम्

सम्पादकः
**श्रीचरणाज्ञाङ्कितः गोस्वामी गोकुलनाथः**

संशोद्धा
**डॉ. गिरिशः जानी**

**Gaṅgāvataraṇacampūḥ :** Composed by Shankar, son of Balakrishna Dixit. The Edition of this work in facile Sanskrit is prepared on the basis of a manuscript belonging to H. H. Goswami Shri Gokulnathji Maharaj Mota Mandir Sansthan, Mumbai. The present Celebrating Samskrutam Series is our effort to publish various genres of creative writing in Sanskrit. This series is dedicated to Kalanidhi H. H. Goswami Shri Gopinathji Maharaj.

To download Gangavatarana Champu (Pdf) kindly visit
www.vallabhacharyakrupa.org

पत्रप्रेषणसङ्केतः :

**Shri Govardhanesh Prakashan Mandal**

Administrator : Shri Bipinbhai Shah
Shop No. 40, 1st Bhoiwada,
H. H. Shri Gokulnathji Maharaj Lane,
Mumbai - 400 002.

मुद्रक :

**Pratha Printers**

Nathalal Bhuvan, 3rd Floor,
133, V. P. Road, Mumbai - 400 004.
Ph. : 09167339603
email : ccgnik@gmail.com

|| श्रीरामाय नमः ||

# अथ गङ्गावतरणचम्पूप्रारम्भः ।

|| श्रीगणेशाय नमः ||

|| श्रीगङ्गायै नमः ||

पद्यम् -

लसद्दानकीलालकल्लोलिनीभिः
परिप्लाव्य गण्डस्थलीं लोलमौलिः ||
हसन्हासयन्नेकगङ्गाधरं यः
समव्यादभव्याद्भवानीतनूजः ||१||

प्रविकासिताब्जखण्डः प्रत्यूहध्वान्तखण्डने चण्डः ||
भुवनाभयकरदण्डः स जयति विघ्नेशमार्तण्डः ||२||

एकं स्तनं धयन्नपि तिर्यग्वलनोर्ध्वशुण्डयेन्दुसुधाम् ||
वरदानवदान्यकरः किरतु स विघ्नान्द्विपेन्द्रास्यः ||३||

परीरब्धां स्थाणुं निजसमधिकारुण्यकलितां
त्रयाणां देवानां त्रिगुणपुरुषार्थौघफलिताम् ||
हरन्तीं भक्तौघे भवभुजगदष्टे विकलतां
हिमाद्रावुद्भूतां निजहृदि भजे कामपि लताम् ||४||

कूजत्कोकिलकाकलीकलरवा पीयूषबद्धादरा
मृद्वीकाविलसद्रसौघगरिमामाधुर्यधुर्योद्धुरा ||
उन्मीलन्मधुमाधुरीपरिचिता मुग्धाङ्गनाजल्पना-
कल्पा कस्य भवेन्न काव्यरचना मातः कृपातस्तव ||५||

वेगात्पूरितसिन्धवः सुजनतामुक्त्यङ्गनाबन्धवः
पापालीपतनान्धवः सुरवधूहारावलीबन्धवः ।।
आत्मज्ञापनबिन्दवः कलितमस्तोमोद्धृता बिन्दवः
स्वःस्त्रीक्रीडनकन्दवस्तव मुदे गाङ्गाः पयोबिन्दवः ।।६।।

वन्दे सुबन्धुबाणौ कविसम्राट्कालिदासभवभूती ।।
शेषाशेषमुखादिव येभ्यो वाणी सहस्रधा समभूत् ।।७।।

वल्मीकभूहरगिरिं वन्दे कविकाव्यकन्दभुवम् ।।
यन्मुखकन्दरनिर्गतनिर्झरवाग्जाह्नवी पुनाति जगत् ।।८।।

वन्दे सज्जनसङ्घं येषामुपकारकारिणी वाणी ।।
भूषयति क्ष्मावलयं गाङ्गमिता गाङ्गधारेव ।।९।।

फल्गुमपि वल्गुवचनं स्वानुगतं गौरवान्वितं तन्वन् ।।
संयुक्तवर्णतुलनां तुलयति न कथं कथं सुजनः ।।१०।।

कर्णपथेषु नयन्ति न धन्यानां पण्डितम्मन्याः ।।
सरसोक्तीः किमु केका भेकाः शृण्वन्ति वाचाटाः ।।११।।

बहुतररसहीनं भूरिदीनं वचोभिस्-
तदपि हि मम काव्यं नव्यमित्यादरेण ।।
भवभवभयभङ्गानङ्गदासङ्गिगङ्गा-
स्तुतिरिति बुधसङ्घास्तूर्णमाकर्णयन्तु ।।१२।।

काव्यसुधासुस्वादः खलसङ्घेनाऽनुभूत एव स्यात् ।।
यदि नानारसरसने रसनेर्ष्यादोषदूषिता न स्यात् ।।१३।।

वसुधाकाव्यसुधाब्धौ खलसङ्घेनाशुमग्नमेव स्यात् ।।
दैवाद्यदि तद्दोषान्वेषणतुम्बीफलान्वितं न स्यात् ।।१४।।

कथमपि कलहंसैः साकमाधूय पक्षान्
सपदि समभियातो मानसं वायसौघः ।।

दरदलितमरन्दासारमाराद्विहाय
क्वचिदपि निजभोज्यान्वेषणोत्कः किलासीत् ।।१५।।

पङ्कजसाराहारा सन्मुक्तासक्तमानसाः सततम् ।।
वायसहंसगणा इव कथं निखिलाः खला वद्याः ।।१६।।

विलसतु खलेषु खलता खलतावत्तापमपनयतु ।।
एषा यया सुजनता जनतापहरा प्रकाशिता भवति ।।१७।।

नानाश्लेषवती सुरूपकयुता मिथ्याविरोधान्विता
सङ्ख्याता परिसङ्ख्यया परिकराक्रान्ताऽतिरेकान्विता ।।
नित्यं तद्गुणसङ्गता ललितयुक्नानोपमासंयुता
मुग्धा चन्द्रमुखीव कस्य च महत्पुण्यैर्भवेद्भारती ।।१८।।

**गद्यम् -**

आसीदासीमक्ष्मावलयरक्षणदीक्षाविचक्षणक्षपितारातिततितिमिस्त्रमुण्डपुण्डरीकताण्डवितयशःकासारः ।। कुटिलकौशिकगणान्धीकरणमहौषधिरिपुग्रीष्मदिवससन्तापभीष्मः । प्रचण्डदोर्दण्डाविर्भवत्प्रतापमार्तण्डः ।। सुहृत्कैरवविकासाह्लादितसज्जनक्षत्रनक्षत्रपरिकलितचञ्चद्द्विजचकोरपारणाकारणीभूतामृतायशशयः सुधाकरः सकलकलाकुलितः सर्वजनरञ्जनचातुरीधुरीणतासमासादितराजराजोपमानतानतारिमण्डलमुकुट-मणिमरीचिनिचयचमत्कारचर्चितचरणनखमयूखप्रकरतिरस्कृतेन्द्रचापसम्पत्सम्पादिताद्भुततमतमःपाटनकर-सहस्त्रकरकरप्रकाशप्रकाशितसिंहासनधरणिपरिसरः अनवरतवितरणजलतलतरङ्गिणीनिर्वापितवनीपक-कुलदारिद्र्यानलज्वालमालोल्लसितकीर्तिलताप्रतानसञ्छादितब्रह्माण्डमण्डपः ब्रह्माण्डमण्डपाडम्बर-विष्टम्भस्तम्भायमानभुजदण्डः सगरो नाम यस्मिन् महीमण्डलमनुशासति कुटिलता ललनालकेष्वेव सकलङ्कता चन्द्र एव निष्कामत्वं मुनिजनेष्वेव कुटिलान्तःकरणत्वं कम्बुषु लघुगणनं प्रस्तारेष्वेव भुजङ्गप्रयातं छन्दस्येव वृश्चिकस्थितिः राशिचक्र एव हृदयस्फोटो दाडिमेष्वेव त्वगुद्दलनं भूर्जेषु सूचीभेदः कञ्चुकादीनाम् अधररसिकत्वं कामिजनेष्वेव नीचसंसर्गो जलानामेव विग्रहः समासेष्वेव कर्णपीडनं महाभारते नपुंसकत्वं शब्देष्वेव निपातश्रवणं व्याकरणे सन्निपातश्रुतिर्वैद्यकशास्त्रे निष्ठुरताडनं लोहेषु चञ्चलत्वं विद्युल्लतासु निःसारत्वं शरदभ्रेषु भ्रमणशीलत्वं भ्रमरेष्वेव भयभीतत्वं पक्षिषु अग्निसन्निपातः पतङ्गानामेव जलसन्निपातः क्षेपणीनां कूपसन्निपातो घटानामेव यस्य च ।

**प० -**

**प्रत्यर्थिप्रथमानकम्पनकलाकौशल्यशिक्षाप्रदः**
**सख्ये सन्मुखवैरिविग्रहगृहस्थायी परासृक्जलैः ॥**
**सङ्ग्रामाध्वरदीक्षितोऽवभृथवत् दातुं द्विजेभ्यो धनं**
**कोशस्थानमुपैति निर्मलतरः सच्चन्द्रहासः करे ॥१९॥**

**यस्य प्रौढप्रतापोर्जितगतिविजितस्तेजसां राशिरर्कस्-**
**ताम्यत्यन्तःसमुद्रं भ्रमति च गगने दिग्विमूढः समन्तात् ॥**
**यत्कीर्तिस्तोमसोमस्त्रिभुवनमखिलं पूरयन्स्वप्रभाभिस्-**
**त्रासात्संक्षीयमाणं विधुमपि धिनुते स्वप्रकाशार्पणेन ॥२०॥**

**सा सभा यस्य सारैव वरैः साधुगतैनसा ॥**
**सा नतैरभिसारावै वैरा सा कामभाससा ॥२१॥**

(पद्मबन्धः)

**ग० -** स हि सकलवसुमतीं वशीकृत्य निजभुजदण्डप्रभवत्प्रतापमार्तण्डप्रविकाशितमित्रततिपुण्डरीककुल-संशोषितारिजातजम्बालसुरचित्सत्पथः नयोपार्जितपाथोधितनयाकृताधिकरणसमर्थोऽर्थवानिममर्थं विचिन्तयामास जडजां चञ्चलामप्येनां कृतार्थयामीति ततश्च वामदेवादिशिष्टवरिष्ठगरिष्ठैर्वसिष्ठादिभिः सम्मन्त्र्य सप्तिसप्ततन्तुं प्रारब्धवान् ततश्च कार्तस्वरचित्रपवित्रपात्रनानाविधान्ननिवहपर्वतान्सर्वतः दधिदुग्धघृतमधुररससप्तकुलाः कुल्याः समकल्पयत् कनकरथहयनगजगजघटाः सम्पादयामास ऋषिवर्यधुर्यप्रेर्यमाणः पुण्याहे कनकलाङ्गलाग्रैः यज्ञभूमिमुल्लिख्य लेखाधिपकल्पोऽनल्प-मण्डपमुपकल्पयामास अनेकजातरूपसुरूपयूपसमूहान्समुत्थापयामास विचित्रवर्णपर्याण-पर्याणितश्यामैककर्णमर्णवोत्थमिव शुद्धवर्णं चतुरङ्गं चित्रगमिव विचित्रगं तुरङ्गममामुमोच ।

**प० -**

**पिता यदा मखकरणे समुत्सुकस्-**
**तदाज्ञयाययुमभितः समभ्ययुः ॥**
**बलान्विताः षडयुतसङ्ख्यया मिताः**
**सुतास्तदा सगरमहामहीभुजः ॥२२॥**

अपि च ।

छद्मकर्मकरणे महादरस्-
तं जहार तुरगं पुरन्दरः ।।
तन्निबद्ध्य कपिलाश्रमे श्रमान्-
निर्ययौ गगनवीथिकाश्रयः ।।२३।।

अपि च ।

परिभ्रामंभ्रामं चतुरतुरगान्वेषणपरश्-
चखानाधोभूमेः सगरसुतसङ्घोऽघकलितः ।।
परिप्राप्ते काले कपिलमुनिकोपोत्थदहन-
ज्वलज्ज्वालाजालेऽपतदथ पतङ्गायिततनुः ।।२४।।

यदाज्ञां समासाद्य सद्योंऽशुमान-
प्यगाद्वाजिनोऽन्वेषणे दत्तचित्तः ।।
तदा पूर्वजानामुदन्वन्तमारा-
दुदन्तं सुहृद्वैनतेयादगात्सः ।।२५।।

कथं कपिलशापतो भसितभावसम्भाविताः
कदा त्रिदिवमाप्नुयुर्निरयवासनायासतः ।।
वदस्व यदि मां दयालुरसि दीनबन्धुप्रियः
प्रियं प्रकथ्यन्ति हि प्रकृतिपुण्यभाजो भुवि ।।२६।।

शुद्धशान्तस्वरूपाच्च शुद्धतत्त्वानुभाविनः ।।
यद्दग्धाः सगराः शङ्के सलिलादग्निरुत्थितः ।।२७।।

**ग० -** तदानीमकरुणानुजः करुणतया निजपूर्वजपरिचरणपरायणान्तःकरणतया समाकुलचित्तं चिन्तान्तर्गतगुरुमखवरसम्पूर्णताकामं कामाभिरामं चरणावनततमं तमंशुमन्तं मातृसम्बन्धितया वैनतेयोऽप्यवोचत्

**प० -**

**अनेकवृजिनावलीवलितजीवसङ्घः क्षणात्**
**कथञ्चन समुद्धरेन्निरयवासनायासतः ।।**
**कृपाङ्कुरलसद्घनीनिगमभावनाभावनी**
**कथं पतितपावनी यदि च नावनीं चेदियात् ।।२८।।**

**कपिलनयनवह्निज्वालमालावलीढं**
**सगरनृपसुतानां देहजं भस्मराशिम् ।।**
**हिमनगपतिपुत्री चेत्पवित्रीयति द्राक्**
**तव सुरपतिलोकः पूर्वजानां तदा स्यात् ।।२९।।**

**ग० -** ततोऽशुमानपि पितृमातुलादतुलं सुललिततरमुपायमाकर्ण्य वैवर्ण्यसमन्वितोऽपि रसातलचरोंऽशुमानिव तमोविनाशनायेव भूविवरमाविवेश । यत्र च असङ्ख्यसाङ्ख्यज्ञसङ्ख्यावद्-ब्रह्ममुनिदेवमुनिसिद्धमुनिसंसेवितपादपङ्कजपरागोपरागश्च यस्य जनकः कर्दमोऽप्यपङ्कः यश्च नन्दितदेवहूतिरपि अनन्दितदेवहूतिः घनश्यामस्वरूपोऽपि कपिलः आधिरहितोऽपि विरचितसमाधिः कर्दमसम्भवोऽप्यपद्मः गङ्गासङ्गोत्सुकोऽप्यसदाशिवः सुन्दरोऽप्यमुग्धः अपलितोऽपि पाण्डुकेशः अलाञ्छनोऽपि पद्माङ्कुशलाञ्छितचरणः विरचिततत्त्वमुद्रोऽपि व्याख्याततत्त्वागमः सर्वंसहोऽपि न धरणिमण्डलं क्षमाभृदपि न शैलराजः अबन्धनोऽपि समासादितमुक्तिः जननीतिहरश्च यश्च

**प० -**

**भवभवजडजीवान् ज्ञानहीनान्विलोक्य**
**प्रचुरकरुणयाऽसौ भूतले प्रादुरासीत् ।।**
**कपिल इति समाख्यः शुद्धतत्त्वावबोधं**
**विगलितमपि कालात् साङ्ख्यमाख्यन्मुनिभ्यः ।।३०।।**

अपि च ।

**परिगतभवशोधैः शुद्धतत्त्वावबोधैर्-**
**जगदपि परिनेतुं मुक्तिभावं समर्थः ।।**

अपगतभवजालं देहमालम्ब्य यत्ना-
दगमयदथ मुक्तिं देवहूतिं न चित्रम् ।।३१।।

अपि च ।

चिन्तनात्सत्त्वतत्त्वस्य मूर्तिमत्सत्त्वरूपवान् ।।
न्यायेन भृङ्गकीटस्य कपिलत्वमगात्किमु ।।३२।।

**ग०** – ततस्तच्चरणारविन्दविगलन्मकरन्दबिन्दुवृन्दास्वादसम्भावितचित्तवृत्तिसम्भवत्प्रेमप्रवाहपुलकिततनुः

अथ तमभिससार प्रेमभावावबद्ध-
प्रकटितपुलकौघः साञ्जलिः सावधानः ।।
अनमदथ धरण्यामंशुमाँस्तत्पदाब्ज-
स्मरणगततमस्को भास्कराभो बभूव ।।३३।।

ततः ।

तदाज्ञामासाद्य प्रखरखुरसंक्षोभितमहा-
महीपृष्ठं तिष्ठेत्यवददथ बलं विधृतवान् ।।
पुरस्कृत्वा नत्वा मुनिवरमथो वाजितिलकं
कलङ्कान्निर्मुक्तः समगमदयोध्यापुरवरम् ।।३४।।

ततः ।

अरुणानुजोदितमुदन्तमादराद्
गुरवे निवेद्य तुरगं च सादरः ।।
सगरो महामखविधिं समाप्य वै
प्रशशास भूमिवलयं रिपून् जयन् ।।३५।।

अथ कथमसमञ्जाः सागरो नागराणा-
मपृथुपृथुकसङ्घैः क्रीडमानः शरय्वाम् ।।
जवतरजलजङ्घे मज्जयामास सज्जः
समभवदयशोभिः कज्जलाभः क्रमेण ।।३६।।

इति कुचरितसङ्घैः पीडयन् पौरवर्गं
विदलितबहुगर्वः खर्वितास्यः प्रजाभ्यः ।।
सगरनृपतिनासौ धिक्कृतः सर्वलोकैः
कथमपि निजराज्याद्वै बहिष्कारितोऽपि ।।३७।।

स्मरन्तं तमुदन्तं तं पौत्रेणांशुमतोदितम् ।।
अनैषीद्बलवान्कालः सगरं नगरं स्वकम् ।।३८।।

इति समुदितराज्यं प्राज्यमासज्य पौत्रे
सकलगुणविचित्रे चित्रकीर्तिश्चिरेण ।।
चरमवयसि चिन्तासन्ततिं प्राप्य गङ्गा-
चरणशरणभूतो भूपतिः स्वः समागात् ।।३९।।

इति श्रीसाहित्यपारावारपारीणकविताकान्तारकण्ठीरवसर्वस्वदानदीक्षाविचक्षण-
श्रीमद्दीक्षितबालकृष्णसूनुशङ्करविरचिते गङ्गावतरणचम्पूप्रबन्धे गङ्गाचरणाङ्कः प्रथम उच्छ्वासः ।।१।।